1. 15); नाज्ञाताद्गृह्यते भाटी चरन्ति म्लेच्छगायना: SamaMā. 3. 26; 'सर्वस्य वशी सर्वस्येशान:' इति तेषामज्ञातानामादरेण विधानात् VedāntSā.(Rā.) 317. 5 (*on* iii. 3. 39); निदेशेनामुना वेत्ति स्वमज्ञातं च धम्मट: RājTa.(Ka.) 7. 1027; किमज्ञातं सुबुद्धीनामतो मन्दार्थमुच्यते Lilā. 61 (12); प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां ग्रामो ज्ञातोऽज्ञात इत्येवमादिव्यपदेश: SarvaDaSaṁ. 5. 213; **Aii** of unknown nature or species or relation प॒रा तम॑ज्ञा॒तं यक्ष्म॑मध॒राञ्चं सुवामसि AV. vi. 127. 3; अज्ञा॑ते किमि॒हेच्छ॑सि AV. x. 1. 20; अज्ञाते P. v. 3. 73; GaṇPā. 186. 19; GaṇRa. 3. 187 (229); अज्ञातान् डुण्डुभांश्चैव …विद्यात् मधुरान् रसपाकत: BhelaS. 46. 4 (1. 27); नातिकाल्यं नातिसायं नातिमध्यंदिने स्थिते । नाज्ञातेन समं गच्छेत् ManuSm. 4. 140; 5. 17; अज्ञाते मन्त्रे तद्वतो भावशब्द: S'ābaBh. 434. 5 (*on* ii. 1. 32); वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचि YājñaSm. 1. 191; अनुक्तवृत्तिस्त्वज्ञात: परपूर्वापतिस्तथा।…पितृश्राद्धेषु वर्जिता: BṛParāSm. 7. 9; CāndraVyā. iv. 3. 62; JaineVyā. 271. 29 (*on* iv. 2. 35); S'ākaṭāVyā. iii. 4. 86; SiddhaHe. vii. 3. 33; सर्वथा तद्भवेन्नूनमज्ञातमौषधं यथा DevīBhāP. v. 4. 18; न ह्यज्ञातस्य रोगस्य चिकित्सा जातु युज्यते TrisaS'aPuC. i. 1. 646; भोज्यमिदे फलं सर्वमज्ञातं बहुबीजवत् MalliC. 7. 645; न ह्यज्ञाते व्याधौ चिकित्सा PuruṣPa. 123. 8; अज्ञातमथ तनये त्यज शोकशङ्कुम् BhikṣāKā. 21. 5; याचितभूपाप्रभृतेरज्ञातस्य व्ययस्याथ।… कथयेद्वित्तप्रणाशनं चतुरा KandaCū. vi. 3. 8; न द्वितीय: नायकसंबन्धित्वेनाज्ञातस्य मुखचुम्बनमात्रस्याहृद्यत्वात् RasGaṅ. 501. 8; **Aiii** of unknown identity वी॒रुधो॒ याश्च॒ पश्या॑मि॒ चक्षु॑षा । अज्ञा॑ता जानी॒मश्च॒ AV. viii. 7. 18; अथैतं राजतं वृषलाय वाज्ञाताय वातिप्रयच्छति BaudhS'S. i. 61. 4; पुष्पेषून्मत्तकाद्येषु त्वज्ञातेषु विशेषत: PauṣkS. 25. 22; संग्रामाग्रे मानिनां लज्जितानाम् । अज्ञातानां शत्रुभिर्युक्तमुच्चै: श्रीमन्नाम श्रावयन्ति स्म नम्रा: S'iśuVa. 18. 16; अज्ञाताय किमर्थं वासो दत्त: KuṭṭaMa. 226; अज्ञातोऽतिथिरुच्यते VṛGautaSm. 535. 4 (6); यत्र त्वज्ञातश्चण्डालादि: कस्यचिद्गृहेऽवतिष्ठते BālaKrī. ii. 139. 7 (*on* 3. 257 (?263)); अज्ञातेऽपि तथा पुत्रे प्रस्तुता साप्यसंस्तुता S'āliC. 6. 198; भो राजन् अज्ञातस्य कथं दीयते (दुहिता) SiṁhāDvā.(App.) 242. 1; अज्ञातस्य गले पुंसो दृष्ट्वा मालां प्रलम्बिताम् । रुष्टा: सर्वेऽपि भूपाला: CitraPaC. 220; अज्ञाता नामतो जातितश्च अज्ञाता: VīraMi.(Āhnika.) 545. 3; **Aiv** incognito, undetected वनं प्रस्थापयामास सप्त वर्षाणि पञ्च च। अज्ञातमेकं राष्ट्रे च तथा वर्षं त्रयोदशम् MahāBhā. i. 55. 40; हस्ती श्वेत इवाज्ञात: कथं जिष्णुश्चरिष्यति MahāBhā. iii. 36. 24; iv. 4. 8; अज्ञातश्चैव लोकस्य विजहार युधिष्ठिर: MahāBhā. vii. 23. 3; अज्ञातो नगरं प्रविश्य भवतो मित्रगृहे कालं प्रतिपालयामि Avimā. ii. 11 (6); तयोरज्ञातयोरेवं यथोचितविधायिनो: । अतीयाय निशानेका क्षणाद्दर्शनभीतयो: PadmP.(Ra.) 16. 212; विवाह्य सुन्दरीं तत्र तिष्ठाज्ञातो यथेच्छसि KathāSaSāg. viii. 6. 229; नृप: । काकशङ्की भवेन्नित्यमज्ञातां वसतिं वसेत् AgniP. 224. 30; वने द्वादशवर्षाणि निवासाय पणे कृते। त्रयोदशे तथाज्ञाते विजिता: पाण्डवा ययु: DaśāvaC. 8. 460; नाज्ञात: प्रविशेच्छालां बालो वृद्धोऽथ भिक्षुक: Hastyāyur. 163. 5 (2. 6); देव कामपि युक्तिं कृत्वागतास्मि येनाज्ञात एव भवान् स्थास्यति GopāKeCan. 132. 23; किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि SābiDa. 596. 3; अज्ञाता एव गृहिणां भक्षयन्त्याखुवद् गृहे KaliVid. 42; (कामपालोऽपि) परिवारेणाज्ञातो गत: पश्चनदिश्रेष्ठिगृहे KathāK. 55. 25; **Av** unexpected, not thought of, sudden ततोऽभ्यगच्छत्कौन्तेयमज्ञातो नाम माधव: MahāBhā. i. 210. 4; हरीणामियमज्ञाता विपत्ति: सहसागता Rāmā. iv. 55. 8; **Avi** supersensual अज्ञाते चक्षुराद्यविषयभूते वाचामगोचरे…प्रत्यग्भूते ब्रह्मणि चर्या SanatBh. 226. 11 (*on* 1. 31); सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते VedāntSā.(Sa.) 26. 13; **Avii** unintentional संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तम: । अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषत: ManuSm. 5. 21; उपवासस्त्रिरात्रं तु दुष्टभक्ताशिनो भवेत् । अज्ञाते ज्ञानपूर्वे तु तद्दोषोपशमे(? मो) न तु MārkP. 35. 27; एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् । मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुन: SkandP. iv. 51. 79; अज्ञातमपराधं यमोऽपि क्षमते PuruṣPa. 195. 11; **B** not knowing, ignorant प्रस्थाने वा पिता तस्य पञ्चत्वं च गतो भवेत् । श्राद्धादिकं तु पुत्रेण अज्ञातेन कृतं यदा BṛYamaSm. 5. 10; अज्ञातश्च द्विजो यस्तु विधवामुद्वहेद्यदि । परित्यज्य च वै तां च प्रायश्चित्तं समाचरेत् LaghvāśvaSm. 21. 11; नैवेद्यं भुक्त्वा चेदीदृशी गति: । अकामतश्चाप्यज्ञातो जीर्णं मार्गस्थितं सुत । यो भक्षेत् कामतो ज्ञातो नित्यं नैवेद्यमीप्सितम् । न जानन्ति गतिं तस्य वेदा: PañcaRā.(Nā.) i. 4. 74; गरलं तन्मद्ये पपात । तेनाज्ञातेन पीतम् PurāPraSaṁ. 100. 2; *m.* a specific fallacy अज्ञात: संशयासिद्धव्यतिरेकान्वयादित: PramāSaṁ. 3. 49; *n.* the unknown element रूपं न्यस्याव्यक्ते प्राग्विधिना यत्फलं भवेत् तेन । भक्तं परिदृष्टफलं प्रभागजातौ तदज्ञातम् GaṇiSāSaṁ. 2. 107.

**अज्ञातक** (ajñāta-ka) *adj.* unknown ज्ञात एव ज्ञातक: । अज्ञात एव अज्ञातक: GaṇRa. 3. 187 (230)

**अज्ञातकन्द** (ajñāta-kanda) *m.* unknown or unidentified bulbous root अन्ये तेऽज्ञातकन्दाश्च ते न प्रोक्ता मयानघ HārīS. i. 16. 35.

**अज्ञातकरण** (ajñāta-karaṇa) *n.* unknown means एतेन अज्ञातकरणम् इन्द्रियम् इति प्रत्युक्तम् अज्ञातत्वस्य दुर्ज्ञानत्वात् TarkSaṁ.(Ā.) 34. 21; इन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वाद् अज्ञातकरणजन्यत्वात् SarvaDaKau. 56. 7.

**अज्ञातकरणकत्व** (ajñātakaraṇaka-tva) *n.* the state of having an unknown instrument परोक्षत्वे अज्ञातकरणकत्वानुपपत्ते: TattvCin. i. 680. 7.

**अज्ञातकरणता** (ajñātakaraṇa-tā) *f.* absence of knowledge of the instrument (of *pratyakṣa*) अज्ञातकरणतया ज्ञानजननार्थमनुमानानपेक्षणात् AdvaiSi. 363. 8.

**अज्ञातकरणत्व** (ajñātakaraṇa-tva) *n.* **A** the state of having an unknown instrument अज्ञातकरणत्वापातात् KhaṇḍanKhā. 517. 16; प्रतिपत्तेरापरोक्ष्यात्…अज्ञातकरणत्वाच NyāyKuA. ii(1). 230. 8; ii(1). 238. 1; ततश्चाज्ञातकरणा(? ण)त्वाद् रूपादिज्ञानवदेवाभावज्ञानस्येन्द्रियजन्यत्वं स्वध्यवसानम् TārkiRa. 105. 4; TattvCin. i. 681. 7; **B** the state of being an unknown instrument or means न हि संस्कार: प्रत्यक्षादिष्वन्तर्भवति । … अज्ञातकरणत्वाच NyāySu.(Ja.) 277A. 13 (*on* ii. 1. 2); नाप्यनुमाने संस्कारस्याज्ञातकरणत्वात् SarvaDaKau. 52. 3; यद्यपीन्द्रियमनुमेयं तथापि तस्याज्ञातकरणत्वान्नानुमोपजीव्या Nyāyāmṛ. 106A. 5.

**अज्ञातकरणा** (ajñāta-karaṇā) *adj.* (*f.*) whose instrument or means is not known अज्ञातकरणाप्येवं स्मृतिर्निर्व्यक्षतां गता MānaMe. 139. 14.

**अज्ञातकरणिका** (ajñāta-karaṇikā) *adj.* (*f.*) having an unknown instrument एवमभावधी: परोक्षा चेत्तदा नाज्ञातकरणिका TattvCin. i. 681. 4.

**अज्ञातकरणीय** (ajñāta-karaṇīya) *adj.* ignorant of what is worth doing किमप्यज्ञातकरणीयै: … अमरगणैरसकृदुपसंगृह्यमाणचरणारविन्दमालक्ष्य चन्द्रशेखरम्…सनकादय: … स्तोतुमारेभिरे NīlaVi. 102. 19.

**अज्ञातकर्ण** (ajñāta-karṇa) *m.* (Astron.) unknown hypotenuse अज्ञातकर्णे फलसंस्कृतोत्थस्फुटस्वकेन्द्रोद्भवदो: फलं स्यात् SiddhāTaVi. 120. 13; तच्चापं चाज्ञातकर्णस्य मानमत्र व्यक्तं जायते तद्विलोमात् SiddhāTaVi. 159. 8.

**अज्ञातकर्तृक** (ajñātakartṛ-ka) *adj.* having an unknown agent खुरपुटनिष्पेषशब्देन चाज्ञातकर्तृकं गमनमनुमितम् TantrRaha. 27. 22.

**अज्ञातकर्तृकत्व** (ajñātakartṛka-tva) *n.* the state of having an unknown agent नैवं समस्तयोरेव मैत्रावरुणचोदना । अज्ञातकर्तृकत्वेन S'āstrDī. 330. 11 (*on* iii. 7. 21); अज्ञातकर्तृकत्वे…आप्तकर्तृकत्वनिश्चयाभावादप्रामाण्यशङ्का स्यादिति चेन्न NyāyPari. 384. 7.

**अज्ञातकर्तृभेद** (ajñātakartṛ-bheda) *adj.* (act of running) specified by an unknown agent अश्वस्याप्रतिपन्नगुणविशेषस्य प्रत्यक्षहेषाशब्दानुमितस्य … अज्ञातकर्तृभेदस्य धावनस्य च श्वेतोऽश्वो धावतीत्यन्वयबोधकत्वदर्शनात् PrakaPañ. 392. 12.

**अज्ञातकर्मन्** (ajñāta-karman) *n.* unknown rite उत्पत्तिविधिरज्ञातकर्मस्वरूपबोधपर: VedāntKa. 59. 7 (*on* i. 1. 3)

**अज्ञातकल्प** (ajñāta-kalpa) *adj.* as good as unknown येषामज्ञातकल्पानि नामगोत्राणि पार्थिव । ते हतास्तत्र भीष्मेण शूरा: MahāBhā. vi. 111. 9.

**अज्ञातकाम** (ajñāta-kāma) *adj.* ignorant of sexual desire, to whom love is unknown अज्ञातकामा निष्कोशा निर्गुण्डा इति च स्मृता: । वधूपस्थापने राज्ञाम् BhāvPra.(S'ā.) 293. 11(10)

**अज्ञातकामत्व** (ajñātakāma-tva) *n.* unawareness of or ignorance about sexual urge or desire तयोरनभिप्रेतत्वादज्ञातकामत्वाच्च काम: स्यान्न वेति संशय: JayaMa. 356. 25 (*on* 6. 6)

**अज्ञातकामशास्त्रार्था** (ajñāta-kāmaśāstrārthā) *adj.* (*f.*) ignorant of the teachings of Erotics सहास्यमभया प्राह कपिले…अज्ञातकामशास्त्रार्थे MalliC. 7. 296.

**अज्ञातकारण** (ajñāta-kāraṇa) *adj.* cause (of whose death) is unknown तस्मिन्नेवोत्सवदिने दीर्घदर्शी व्यपद्यत । अज्ञातकारण: BṛKathāMañ. ix. 2. 658; VetāPañ. 82. 24.

**अज्ञातकारणत्व** (ajñātakāraṇa-tva) *n.* the state of having an unknown cause योगिनामज्ञातकारणत्वादिग्रहे … साक्ष्येव शरणम् GuruCandr. ii. 97. 13.

**अज्ञातकाल** (ajñāta-kāla) *adj.* whose time is unknown यानि चाज्ञातकालान्यङ्गानि तेषां प्रधानकालत्वं वक्ष्यते TantrVā. 1095. 7 (*on* iii. 6. 22)

**अज्ञातकालम्** (ajñāta-kālam) *adv.* for an unknown period of time सुखसागरे निमग्नौ रविभावज्ञातकालमवतस्थाते PadmP.(Ra.) 99. 117.

**अज्ञातकुल** (ajñāta-kula) *n.* unknown family अज्ञातकुलजातस्य मे वृद्धा मिलिता कथम् CampaS'reKa. 366; *adj.* of unknown family अज्ञातकुलस्य